# श्री चामुण्डेश्वरी अष्टोत्तर शतनाम स्तोत्रम्

श्री चामुण्डा माहामाया श्रीमत्सिंहासनेश्वरी ।

श्रीविद्या वेद्यमहिमा श्रीचक्रपुरवासिनी ॥ १॥
श्रीकण्ठदयित गौरी गिरिजा भुवनेश्वरी ।
महाकाळी महाल्क्ष्मीः माहावाणी मनोन्मणी ॥ २॥
सहस्रशीर्षसंयुक्ता सहस्रकरमण्डिता ।
कौसुंभवसनोपेता रत्नकञ्चुकधारिणी ॥ ३॥
गणेशस्कन्दजननी जपाकुसुम भासुरा ।
उमा कात्यायनी दुर्गा मन्त्रिणी दण्डिनी जया ॥ ४

कराङ्गु ळिनखोत्पन्न नारायण दशाकृतिः ।
सचामररमावाणीसव्यदक्षिणसेविता ॥ ५॥
इन्द्राक्षी बगळा बाला चक्रेशी विजयाऽम्बिका ।
पञ्चप्रेतासनारूढा हरिद्राकुङ्कु मप्रिया ॥ ६॥

महाबलाऽद्रिनिलया महिषासुरमर्दिनी ।
मधुकैटभसंहर्त्री मधुरापुरनायिका ॥ ७॥
कामेश्वरी योगनिद्रा भवानी चण्डिका सती ।
चक्रराजरथारूढा सृष्टिस्थित्यन्तकारिणी ॥ ८॥
अन्नपूर्णा ज्वलः जिह्वा काळरात्रिस्वरूपिणी ।
निषुंभ शुंभदमनी रक्तबीजनिषूदिनी ॥ ९॥
ब्राह्म्यादिमातृकारूपा शुभा षट्चक्रदेवता ।
मूलप्रकृतिरूपाऽऽर्या पार्वती परमेश्वरी ॥ १०॥
बिन्दुपीठकृतावासा चन्द्रमण्डलमध्यका ।
चिदग्निकुण्डसंभूता विन्ध्याचलनिवासिनी ॥ ११॥
हयग्रीवागस्त्य पूज्या सूर्यचन्द्राग्निलोचना ।
जालन्धरसुपीठस्था शिवा दाक्षायणीश्वरी ॥ १२॥
नवावरणसम्पूज्या नवाक्षरमनुस्तुता ।
नवलावण्यरूपाड्या ज्वलद्द्वात्रिंशतायुधा ॥ १३॥
कामेशबद्धमाङ्गल्या चन्द्ररेखा विभूषिता ।
चरचरजगद्रूपा नित्यक्लिन्नाऽपराजिता ॥ १४॥
ओड्यान्नपीठनिलया ललिता विष्णुसोदरी ।
दंष्ट्रा कराळवदना वज्रेशी वह्निवासिनी ॥ १५॥
सर्वमङ्गळरूपाड्या सच्चिदानन्द विग्रहा ।
अष्टादशसुपीठस्था भेरुण्डा भैरवी परा ॥ १६॥
रुण्डमालालसत्कण्ठा भण्डासुरविमर्धिनी ।
पुण्ड्रेक्षुकाण्ड कोदण्ड पुष्पबाण लसत्करा ॥ १७॥

eAstroHelp

शिवदूती वेदमाता शाङ्करी सिंहवाहना ।
चतुः षष्ट्यूपचाराड्या योगिनीगणसेविता ॥ १८॥

नवदुर्गा भद्रकाळी कदम्बवनवासिनी ।
चण्डमुण्ड शिरःछेत्री महाराज्ञी सुधामयी ॥ १९॥
श्रीचक्रवरताटङ्का श्रीशैलभ्रमराम्बिका ।
श्रीराजराज वरदा श्रीमत्त्रिपुरसुन्दरी ॥ २०॥
शाकम्बरी शान्तिदात्री शतहन्त्री शिवप्रदा ।
राकेन्दुवदना रम्या रमणीयवराकृतिः ॥ २१॥
श्रीमत्चामुण्डिकादेव्या नाम्नामष्टोत्तरं शतं ।
पठन् भक्त्याऽर्चयन् देवीं सर्वान् कामानवाप्नुयात् ॥२०॥
॥ इति श्री चामुण्डेश्वरी अष्टोत्तरशतनाम स्तोत्रं ॥

eAstroHelp